न तद्वाक्यं प्रतिहन्ति तदोत्तरकालमनेनाभ्युपगतोऽयमर्थ इत्यवधार्य्य तमर्थन्त्वधिकाय दापयेदित्यर्थः ।” इति व्यवहारतत्त्वम् ॥ * ॥ नाट्यालङ्कारविशेषः । तस्य लक्षणम् । यथा ।“युक्तिरर्थावधारणम् । उदाहरणं यथा,—

‘यदिसमरमपास्य नास्ति मृत्यो-
र्भयमिति युक्तमितोऽन्यतः प्रयातुम् ।
अथ मरणमवश्यमेव जन्तोः
किमिति मुधा मलिनं यशः कुरुध्वम् ॥’

इति वेणीसंहारः ।” इति साहित्यदर्पणम् ॥ (उपायः । यथा, कथासरित्सागरे । ३८ । ५६ ।
“तत्र मृङ्गभुजो देशान्निर्व्वास्यैताचिरात् यथा ।
तां पुत्र! चिन्तयेर्युक्तिं त्वमन्यैर्भ्रातृभिः सह ॥”
भोगः । यथा, सूर्य्यसिद्धान्ते । ७ । २४ ।
“त्रिचतुःकर्णयुत्याप्तास्ते द्विघ्नाश्चिज्यया हताः ।
स्फुटाः स्वकर्णतिथ्याप्ता भवेयुर्मानलिप्तिकाः ॥”
प्रमाणविशेषः । तद्यथा,—
“अत्राणां तन्त्रयुक्तीनां किं प्रयोजनमित्युच्यते
वाक्ययोजनमर्थयोजनञ्च ।”
“असद्वादिप्रयुक्तानां वाक्यानां प्रतिषेधनम् ।
स्ववाक्यसिद्धिरपि च क्रियते तन्त्रयुक्तितः ॥
व्यक्ता नोक्तास्च ये ह्यर्था लीना ये चाप्य-
निर्म्मलाः ।
लेशोक्ता ये क्वचित्तन्त्रे तेषाञ्चापि प्रसाधनम् ॥
यथाम्बुजवनस्यार्कः प्रदीपो वेश्मनो यथा ।
प्रबोधस्य प्रकाशार्थास्तथा तन्त्रस्य युक्तयः ॥”
इति सुश्रुते उत्तरतन्त्रे ६५ अध्यायः ॥)

युग, इ वर्ज्जने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) चन्त:स्थादिः । इ, युङ्गति । इति दुर्गादासः ॥

युगं, क्ली, (युज्यत इति । युज्+घञ् । कुत्वम् । न गुणः । “युजेर्घञन्तस्य निपातनादगुणत्वं विशिष्टविषये च निपातनमिदमिष्यते । कालविशेषे रथाद्युपकरणे च युगशब्दस्य प्रयोगोऽन्यत्र योग एव भवति ।” इति काशिका । ६ । १ । १६० ।) युग्मम् । (यथा, शिशुपालवधे । ९ । ७२ ।

“उपनेतुमुन्नतिमतेव दिवं
कुचयोर्युगेन तरसा कलिताम् ।
रभसोत्थितामुपगतः सहसा
परिरभ्य कश्चन वधूमरुधत् ॥”)

कृतादिकालचतुष्टयम् । (यथा, गीतायाम् ।४।८।
“परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्म्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥”)
वृद्धिनामौषधम् । हस्तचतुष्कम् । इति मेदिनी । गे, १९ ॥ (यथा, मार्कण्डेये । ४९ । ३९ ।
“द्वे वितस्ती तथा हस्तो ब्राह्मतीर्थादिवेष्टनम् ।
चतुर्हस्तं धनुर्दण्डो नाडिका युगमेव च ॥”)
देवानां द्वादशसहस्रवत्सरेण चतुर्युगं भवति । मनुष्यमानेन चतुर्युगपरिमाणं विंशतिसहस्राधिकत्रिचत्वारिंशल्लक्षम् । तत्र सत्ययुगस्य मानम् १७२८००० वर्षाः । त्रेतायुगस्य १२९६००० वर्षाः । द्वापरयुगस्य ८६४००० वर्षाः । कलियुगस्य ४३२००० वर्षाः । इति श्रीभागवतमतम् ॥ तेषां भारतवर्षवर्त्तित्वं विवरणञ्च यथा,—

“चत्वारि भारते वर्षे युगानि ऋषयोऽब्रुवन् ।
कृतं त्रेता द्वापरञ्च कलिश्चेति चतुर्युगम् ॥
पूर्व्वं कृतयुगं नाम ततस्त्रेता विधीयते ।
द्वापरञ्च कलिश्चैव युगानि परिकल्पयन् ॥
चत्वार्य्याहुः सहस्राणि वर्षाणान्तु कृतं युगम् ।
तस्य तावत् शती सन्ध्या सन्ध्यांशश्च तथाविधः ॥
इतरेषु ससन्ध्येषु ससन्ध्यांशेषु च त्रिषु ।
एकापायेन वर्त्तन्ते सहस्राणि शतानि च ॥
त्रेतां त्रीणि सहस्राणि युगसंख्याविदो विदुः ।
तस्यापि त्रिशती सन्ध्या सन्ध्यांशः सन्ध्यया समः ॥
द्वे सहस्रे द्वापरे तु सन्ध्यांशौ तु चतुःशते ।
सहस्रमेकं वर्षाणां दिव्यं कलौ प्रकीर्त्तितम् ॥
द्वे शते च तथान्ये वै संख्यातञ्च मनीषिभिः ।
एषा द्वादशसाहस्री युगसंख्या तु संज्ञिता ॥
कृतं त्रेता द्वापरञ्च कलिश्चेति चतुर्युगम् ।
तत्र संवत्सराः सृष्टा मानुषास्तान्निबोधत ॥
चत्वारिंशत्तथा त्रीणि कृतं युगमथोच्यते ।
विंशतिश्च सहस्राणि कालो ह्येष चतुर्युगः ॥
पृथक्त्वेनेह वक्ष्यामि युगानि तु निबोधत ।
नियुतानि दश द्वे च पञ्च चैवात्र संख्यया ॥
अष्टाविंशसहस्राणि कृतं युगमथोच्यते ।
अयुतन्तु तथा पूर्णं द्वे चान्ये नियुते पुनः ॥
षट्त्रिंशच्च सहस्राणि संख्यातानि तु संख्यया ।
त्रेतायुगस्य संख्यैषा मानुषेण तु कीर्त्तिता ॥
अष्टौ शतसहस्राणि वर्षाणां मानुषाणि तु ।
चतुःषष्टिसहस्राणि वर्षाणां द्वापरं युगम् ॥
चत्वारि नियुतानि स्युर्वर्षाणान्तु चतुर्युगम् ।
द्वात्रिंशच्च तथान्यानि सहस्राणि तु संख्यया ॥
एतत् कलियुगं प्रोक्तं मानुषेण प्रमाणतः ।
एषा चतुर्युगावस्था मानुषेण प्रकीर्त्तिता ॥
चतुर्युगस्य संख्याता सन्ध्या सन्ध्यांशकेन च ।
एषा चतुर्युगाख्या तु साधिका ह्येकसप्ततिः ।
कृतत्रेतादियुक्ता सा मनोरन्तरमुच्यते ॥”
इति मात्स्ये ११८ अध्यायः ॥ * ॥

युगधर्म्मो यथा,—
“ध्यानं परं कृतयुगे त्रेतायां ज्ञानमध्वरः ।
द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे ॥
ब्रह्मा कृतयुगे देवस्त्रेतायां भगवान् रविः ।
द्वापरे दैवतं विष्णुः कलौ रुद्रो महेश्वरः ॥
ब्रह्मा विष्णुस्तथा सूर्य्यः सर्व्व एव कलिष्वपि ।
पूज्यते भगवान् रुद्रश्चतुर्ष्वपि पिनाकधृक् ॥
आद्ये कृतयुगे धर्म्मश्चतुष्पादः सनातनः ।
त्रेतायुगे त्रिपादः स्याद्द्विपादो द्वापरे स्थितः ।
त्रिपादहीनस्तिष्ये तु सत्तामात्रेण तिष्ठति ॥”
इति कूर्म्मपुराणे युगधर्म्मकीर्त्तनं नाम २८ अध्यायः ॥ * ॥ युगावतारा यथा,—
“कृते युगे परं ज्ञानं कपिलादिस्वरूपभृत् ।
ददाति सर्व्वभूतात्मा सर्व्वभूतहिते रतः ॥
चक्रवर्त्तिस्वरूपेण त्रेतायामपि स प्रभुः ।
दुष्टानां निग्रहं कुर्व्वन् परिपाति जगत्त्रयम् ॥
वेदमेकं चतुर्भेदं कृत्वा शाखाशतैर्विभुः ।
करोति बहुलं भूयो वेदव्यासस्वरूपधृक् ॥
वेदांस्तु द्वापरे व्यस्य कलेरन्ते पुनर्हरिः ।
कल्किस्वरूपी दुर्वृत्तान् मार्गे स्थापयति प्रभुः ॥
एवमेष जगत् सर्व्वं परिपाति करोति च ।
हन्ति चान्येष्वनन्तात्मा नास्त्यस्माद्व्यतिरेकि
यत् ॥”
इति विष्णुपुराणे ३ अंशे २ अध्यायः ॥ * ॥

युगधर्म्मान्तरं यथा,—
जैमिनिरुवाच ।
“कलौ युगे महाभाग ! समायाते सुदारुणे ।
भविष्यन्ति जनाः सर्व्वे कीदृशास्तद्वदस्व मे ॥
व्यास उवाच ।
आद्यं सत्ययुगं प्राहुस्ततस्त्रेताह्वयं युगम् ।
ततश्च द्वापरं विप्र ! कलिमन्त्यं विदुर्बुधाः ॥
कृते धर्म्मश्चतुष्पादः सर्व्वधर्म्मरता जनाः ।
वर्णाश्रमाचाररतास्तपोव्रतपरायणाः ॥
नारायणार्च्चनपराः शोकव्याधिविवर्जिताः ।
सत्योक्तिभाषिणः सर्व्वे सदया दीर्घजीविनः ॥
धनधान्यादिसम्पन्ना हिंसादम्भविवर्ज्जिताः ।
परोपकारिणश्चैव सर्व्वशास्त्रविदस्तथा ॥
एवंविधाः सत्ययुगे सर्व्वे लोका द्विजोत्तम ! ।
राजधर्म्मशाहिणश्च भूपाला जनपालिनः ॥
अहो सत्ययुगस्यास्ति कः संख्यातुं गुणान् क्षमः ॥
अधर्म्माचरणं तत्र जनाः केचिन्न कुर्व्वते ॥ * ॥
त्रेतायुगे समायाते धर्म्मः पादोनतां गतः ।
अल्पक्लेशान्विता लोकाः केचित् केचिद्दयाशयाः ।
विष्णुध्यानरता लोका यज्ञदानपरायणाः ।
वर्णाश्रमाचाररताः सुखिनः सुस्थचेतसः ॥
क्षत्त्रा भूमिस्पृशः शूद्राः सर्व्वे ब्राह्मणसेविनः ।
ब्राह्मणाश्च महात्मानो वेदवेदाङ्गपारगाः ॥
प्रतिग्रहनिवृत्ताश्च सत्यसन्धा जितेन्द्रियाः ।
तपोव्रतरता नित्यं दातारो विष्णुसेविनः ॥
कालवर्षी तडित्वांश्च स्त्रियः सर्व्वाः पतिव्रताः ।
वसुन्धरा च शस्याढ्या पुत्राश्च पितृसेविनः ॥*॥
त्रेतायुगस्यावसाने द्वापरे युग आगते ।
द्विपादो भूतवान् धर्म्मः सुखदुःखान्विता नराः ॥
केचित् केचित् पापरताः केचिद्धर्म्मरतास्तथा ।
केचित् केचित् गुणैर्हीनाः केचित् केचिन्महा-
गुणाः ॥
अत्यन्तदुःखिनः केचित् केचित् चातिधनास्तथा ।
प्रतिग्रहे ब्राह्मणाश्च कदाचिन्न कुर्व्वते स्पृहाम् ।
भूभुजा धनलोभेन कदाचिद्दण्ड्यते प्रजाः ।
विष्णुपूजापरा विप्राः शूद्राश्च द्विजसेविनः ॥
तदा विष्णुर्व्यासरूपी वेदभागं चकार ह ॥*॥
कलौ युगे च विप्रेन्द्र ! सर्व्वपापैकमन्दिरे ।
एकपादोऽभवद्धर्म्मः सर्व्वे पापरता जनाः ॥
ब्राह्मणाः क्षत्त्रिया वैश्याः शूद्राः पापपरायणाः ।
निजाचारविहीनाश्च भविष्यन्ति कलौ युगे ॥
विप्रा वेदविहीनाश्च प्रतिग्रहपरायणाः ।
अत्यन्तकामिनः क्रूरा भविष्यन्ति कलौ युगे ॥